Institut Français de Pondichéry

Collection Indologie - 100.3

Rashtriya Sanskrit Sansthan

संस्कृतवर्षस्मृतिग्रन्थमाला - ८

# शाब्दबोधमीमांसा
# ŚĀBDABODHAMĪMĀṂSĀ

## AN INQUIRY INTO INDIAN THEORIES OF VERBAL COGNITION

### सुबन्तपदार्थविचारात्मकः तृतीयो भागः
### PART III - NOMINAL STEMS AND THEIR SIGNIFICANCE



By
N.S. RAMANUJA TATACHARYA
with the collaboration of
F. GRIMAL
and S. LAKSHMINARASIMHAM

COLLECTION INDOLOGIE 100.3
संस्कृतवर्षस्मृतिग्रन्थमाला – ८

# शाब्दबोधमीमांसा

## ŚĀBDABODHAMĪMĀṂSĀ

An Inquiry into Indian Theories of Verbal Cognition

## सुबन्तपदार्थविचारात्मकः तृतीयो भागः

Part III - Nominal Stems and their Significance.

*By*

**N.S. Ramanuja Tatacharya**

INSTITUT FRANÇAIS DE PONDICHÉRY
RASHTRIYA SANSKRIT SANSTHAN

# विषयसूची

## शब्दार्थसंबन्धविचारः पृ. 1-115

न्यायदर्शनानुसारेण शब्दार्थसंबन्धनिरूपणम् ........ 1
संकेतरूपस्य समयस्य शब्दार्थसंबन्धत्वम् ........ 3
न्यायमञ्जर्यां संकेतस्य शब्दार्थसंबन्धत्वनिरूपणम् ........ 5
तत्र पूर्वपक्षः ........ 5
सिद्धान्तः ........ 7
शब्दार्थयोः अविनाभावो न संबन्धः इति निरूपणम् ........ 7
न्यायभूषणे संकेतस्य शब्दार्थसंबन्धत्वनिरूपणम् ........ 9
शब्दार्थयोः स्वाभाविकसंबन्धस्य निरासः ........ 10
मीमांसकमतेन शब्दार्थसंबन्धनिरूपणम् ........ 11
प्रकरणपञ्चिकायां प्रत्याय्यप्रत्यायकभावस्य संबन्धत्वप्रतिपादनम् ........ 13
शब्दार्थसंबन्धविषये नव्यनैयायिकमतम् ........ 14
पदवाक्यरत्नाकरोक्तरीत्या संकेतस्य वृत्तित्वनिरूपणम् ........ 15
तत्र मीमांसकमतदूषणम् ........ 15
अपभ्रंशानां वाचकत्वविचारः ........ 15
नैयायिकमतेन संकेतस्वरूपपरिष्कारः ........ 16
संकेतस्य नित्यानित्यभेदेन द्वैविध्यम् ........ 17
नागेशकृते नैयायिकमतानुवादतद्दूषणे ........ 18
नागेशदूषणसमाधानपूर्वकं संकेतस्य शब्दार्थसंबन्धत्वसमर्थनम् ........ 19
बोधकारणत्वघटितस्य संकेतस्य संबन्धत्वोपपादनम् ........ 21
अर्थबोधकत्वमेव शक्तिरिति वैयाकरणभूषणकारमतम् ........ 23
तत्र संभवतामाक्षेपाणां परिहाराः ........ 23
बोधकत्वरूपशक्तिग्राहकम्, लक्षणोच्छेदस्य इष्टत्वं च ........ 25
लक्षणावृत्तिस्वीकारे अनुपपत्तयः ........ 25
लाक्षणिकपदानां वाचकत्वे नानार्थत्वशङ्कानिरासः ........ 27
मणिग्रन्थोक्तरीत्या बोधकत्वं शक्तिरिति वादस्य उपक्षेपः परिशीलनं च ........ 28
तत्र आक्षेपः ........ 28
सिद्धान्तः ........ 29

स्वघटकशक्यार्थविषयकशाब्दबोधप्रयोजकलक्षणा, स्वघटकशक्यान्वितसमभिव्याहृतपदार्थविषयकशाब्दबोधप्रयोजकलक्षणा वा अजहल्लक्षणा। तन्निरूपकं पदमजहल्लाक्षणिकमिति पर्यवसितम्।

"योद्धुं छत्रिणो गच्छन्ति" इत्यादौ छत्रिपदस्य एकसार्थवाहित्वे लक्षणा। एकसार्थवाहित्वं च छत्रिरथगजतुरगोष्ट्रादिघटितसमुदायघटकत्वम्। तदेवोद्देश्यतावच्छेदकम्। तादृशघटकत्वावच्छेदेनैव गमनकर्तृत्वरूपविधेयान्वयस्वीकारात् तादृशसमुदायघटकत्रिचतुरादिगमनकाले योद्धुं छत्रिणो गच्छन्तीति न प्रयोगः। शक्यार्थस्य छत्रिणोऽपि शाब्दबोधविषयत्वात् गमनकर्तृत्वान्वितत्वाच्च छत्रिपदलक्षणायाः अजहल्लक्षणात्वम्।

**जहदजहल्लक्षणा**

"यत्र वाच्यैकदेशत्यागेन एकदेशान्वयः तत्र जहदजहल्लक्षणा" यत्पदे शक्यैकदेशमविषयीकृत्य, शक्यैकदेशानन्वितत्वे सति वा, एकदेशविषयकशाब्दबोधजनकत्वं एकदेशान्वितसमभिव्याहृतपदार्थविषयकशाब्दबोधजनकत्वं वा तत्पदे जहदजहल्लक्षणा। तथा च शक्यविशेषणाविषयकशक्यविशेष्यविषयकशाब्दबोधप्रयोजकलक्षणा वा शक्यविशेषणानन्वितशक्यविशेष्यान्वितसमभिव्याहृतपदार्थविषयकशाब्दबोधप्रयोजकलक्षणा वा जहदजहल्लक्षणा, तन्निरूपकं पदं जहदजहल्लाक्षणिकमित्युक्तं भवति। यथा तत्त्वमसीति। अत्र तच्छब्दस्य सर्वज्ञत्वविशिष्टात्मशक्ततया युष्मच्छब्दस्य किंचिज्ज्ञत्वविशिष्टात्मशक्ततया तयोः नीलघटपीतघटयोरेव ऐक्यासंभवेन तच्छब्दशक्ययुष्मच्छब्दशक्ययोः ऐक्यप्रतिपादकोक्तश्रुतेरप्रामाण्यापत्त्या तत्पदशक्यैकदेशसर्वज्ञत्वं युष्मत्पदशक्यैकदेशकिंचिज्ज्ञत्वं च परित्यज्य तत्पदयुष्मत्पदयोः केवलात्मत्वावच्छिन्ने लक्षणा स्वीकार्या।

इदमुदाहरणं तु जीवब्रह्मणोरैक्यं ब्रुवतां मताभिप्रायेण। नैयायिकमतरीत्या तु सोऽयं देवदत्त इत्यादौ तत्तांशस्येदानीमसंभवात् हानम्, इदंत्वांशस्य संभवादहानमिति जहदजहल्लक्षणामाचक्षते।

परे तु घटोऽनित्य इत्यादौ घटत्वस्येव सोऽयं देवदत्त इत्यादौ तत्तांशस्योत्पलक्षणतया भाने न किंचित् बाधकमिति किं जहदजहल्लक्षणयेति वदन्ति — इति नीलकण्ठप्रकाशिकायाम्।

न्यायमते "स कीचकैर्मारुतपूर्णरन्ध्रैः" इत्यत्र कीचकपदं जहदजहल्लक्षणाया उदाहरणम्। तत्र तस्य विशेषणांशं परित्यज्य विशेष्यवेणुमात्रबोधकत्वादिति रामरुद्र्याम्।

## ŚĀBDABODHAMĪMĀṂSĀ

PART III - NOMINAL STEMS AND THEIR SIGNIFICANCE

This volume, third in the series under the project *An Inquiry into Indian Theories of Verbal Cognition*, is devoted to an analytical and critical study of nominal stems viz. underived, ending in the *kṛt*, *taddhita* and feminine suffixes, compound words, and indeclinables, according to the schools of *Nyāya*, *Vyākaraṇa*, *Pūrvamīmāṃsā*, *Advaita*, *Viśiṣṭādvaita* and *Dvaita*.

Among the topics dealt with in this volume are: the nature of the relationship between a word and its sense, and its subdivisions (*abhidhā*, *lakṣaṇā*, *gauṇīvṛtti*); the significance of a word, whether denoting a universal (*jāti*), or an individual (*vyakti*), or the specific configuration of an object (*ākṛti*), or the blend of all three; the different forms of primary signification through which a word conveys the conventional sense (*rūḍhī*), etymological sense (*yoga*), the sense which is both conventional and etymological (*yoga-rūḍhī*), and also the conventional and the etymological senses that are different from each other (*yaugika-rūḍhī*).

Since retiring as Vice-Chancellor of the Rashtriya Sanskrit Vidyapeetha of Tirupati, Professor Ramanuja Tatacharya has been associated with the French Institute of Pondicherry as Honorary Professor.

Professor Tatacharya's profound scholarship has earned him many awards, including the Certificate of Honour for Proficiency in Sanskrit conferred upon him by His Excellency the President of India. He was awarded the title of *Darśanakalānidhi* by the Madras Sanskrit College during its Centenary Celebrations.